इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् ।
यमात्तस्य भयं नास्ति सर्व्वपापात् प्रमुच्यते ॥
महापापी यदि पठेत् नित्यं भक्त्या च नारद ! ।
यमः करोति तं शुद्धं कायव्यूहेन निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २९ अध्यायः ॥ * ॥
पारिभाषिकयमदन्ता यथा,—
"कार्त्तिकस्य दिनान्यष्टावष्टावाग्रहायणस्य च ।
यमस्य दंष्ट्रा एते लघ्वाहारी स जीवति ॥"
इति वैद्यकम् ॥ * ॥
("पङ्कमत्स्यवसातैलघृतगन्धाश्च ये नराः ।
न्यग्रगन्धाश्च ये यान्ति गन्तारस्ते यमालयम् ॥
यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः ।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम् ॥"
इति सुश्रुते सूत्रस्थाने ३१ अध्यायः ॥
अस्य शापवृत्तान्तं शापान्तवृत्तान्तञ्च यमराजशब्दे द्रष्टव्यम् ॥ * ॥ ) शरीरसाधनापेक्षनित्यकर्म्म । इत्यमरः ।२ ।७ । ४९ ॥
"उपायान्तरनिरपेक्षं शरीरमात्रसाध्यं नित्यं यावज्जीवमवश्यकार्य्यं यत्कर्म्म सत्यास्तेयादि तद्यमः । यमेरल् ।
'अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता ।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च ॥'
इति मनुः ।" इति तट्टीकायां भरतः ॥
स च अष्टाङ्गयोगान्तर्गताङ्गविशेषः । स तु दशविधो यथा,—
"ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता ।
अहिंसास्तेयमाधुर्य्ये दमश्चेते यमाः स्मृताः ॥"
इति गारुडे १०९ अध्यायः ॥ * ॥
स च पञ्चविधो यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ।
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम् ॥"
इति तत्रैव २३० अध्यायः ॥
"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।"
इति पातञ्जले साधनपादे ।३०॥ यच्छति नियच्छति इन्द्रियग्राममनेनेति । यम + घञ् । )
संयमः ॥ यथा, अमरः । ३ । २ । १८ ।
"वियामो वियमो यामो यमः संयामसंयमौ ॥"
काकः । शनिः । इति मेदिनी । मे, २३ ॥
( विष्णुः । यथा, महाभारते ।१३।१४९।३० ।
"अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥"
"अन्तर्यच्छतीति यमः ।"इति तद्भाष्ये शङ्कराचार्य्यः ॥ )
यमः, त्रि, ( यच्छति एकत्र गर्भाशये नियतो भवतीति । यम् + अच् । ) यमजः । इति मेदिनी । मे, २३ ॥ तयोर्ज्येष्ठत्वनिरूपणं यथा,
"वहिर्व्वर्षेषु चारित्राद्यमयोः पूर्व्वजन्मतः ।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम् ।
सन्तानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितम् ॥
जन्मप्राधम्यात् ज्येष्ठं यमयोः न तु निषेकप्राथम्यात् जन्मप्राथम्यसन्देहे मुखदर्शनप्राथम्यात् ।" इति उद्वाहतत्त्वम् ॥ ( यथा,—
"शोणेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ ।

यमाविव्यभिधीयेते धर्म्मेतरपुरःसरौ ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥
अनयोरेकस्य वृद्धिरपरस्य च क्षीणताकथमित्यत आह ।
"कर्म्मात्मकत्वाद्विषमांशभेदात्
शुक्रास्रवं वृद्धिमुपैति कुक्षौ ।
एकोऽधिको न्यूनतरो द्वितीय
एवं यमेऽप्यभ्यधिको विशेषः ॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये ॥ )
यमकं, क्ली, ( यमं युग्मभावं कायति प्राप्नोतीति । कै + कः । ) शब्दालङ्कारः । तस्य लक्षणादि यथा,—
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥
अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वमत उक्तं सत्यर्थे इति । तेनैव क्रमेणेति दमो मोद इत्यादेर्विभक्तविषयत्वं सूचितम् । एतच्च पदपादार्द्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविषयतया प्रभूततममिदं दिङ्मात्रमुदाह्रियते ।
'नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
ससुरभिं सुरभिं सुमनोभरैः ॥'
इति माघे । ६ । २ ॥
अत्र पदावृत्तिः पलाशपलाशेति सुरभिं सुरभिमित्यत्र च द्वयोः सार्थकत्वम् । लतान्तलतान्तेत्यत्र प्रथमस्य निरर्थकत्वं परागपरागेत्यत्र द्वितीयस्य एवमन्यत्राप्युदाहार्य्यम् । यमकादौ भवेदैक्यं डलोर्व्वबोर्लरोस्तथा । इत्युक्तनयात् । भुजलतां जड़तामबलाजन इत्यत्र न यमकत्वहानिः ।" इति साहित्यदर्पणे दशमः परिच्छेदः । १० ॥ ( यमकालङ्कारस्तु युग्मपादयमकायुग्मपादयमकाद्यन्तयमक-पादमध्ययमक-पादान्तयमक-पादादियमक-पादादिमध्ययमक-पादाद्यन्तयमक-मध्यान्तयमक-काञ्चीयमकगर्भयमकचक्रवालयमकपुष्पयमकमहायमकमिथुनयमकद्वन्द्वयमकविपथयमकसमुद्गयमकसर्व्वयमक यमकावलीभेदात् बहुविधः । तत्तल्लक्षणोदाहरणादिकं भट्टिकाव्ये दशमसर्गे यमकचक्रे काव्यादर्शे दशमपरिच्छेदे च द्रष्टव्यम् ॥ अस्त्रविशेषः । यथा, महाभारते । ४ । ५५ । ४२ ।
"ततो विराटस्य सुतः सव्यमावृत्य वाजिनः ।
यमकं मण्डलं कृत्वा तान् योधान् प्रत्यवारयत् ॥"
"यमकं प्रवृत्तां निरोधकं मण्डलं कृत्वा ।" इति तट्टीकायां नीलकण्ठः ॥ सहशम् । यथा, महाभारते । ३ । १९ । ८ ।
"मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दक्षिणानि च सर्व्वशः ॥"
"यमकानि सदृशानि ।" इति तट्टीकायां नीलकण्ठः ॥) त्रि, यमजः । इति मेदिनी । के, १४२॥

यमकः, पुं, ( यम् + भावे घञ् । स्वार्थे कन् । )
संयमः । इति मेदिनी । के, १४१ ॥
यमकालिन्दी, स्त्री, (यमः कालिन्दी च सुतः सुता च यस्याः । ) संज्ञा । सा च सूर्य्यपत्नी । इति शब्दरत्नावली ॥
यमकीटः, पुं, ( यमसूचकः कीटः । ) वुर्व्वुरनामा कीटः । इति त्रिकाण्डशेषः ॥
यमकोटिः, स्त्री, लङ्कायाः पूर्व्वं पृथिव्याश्चतुर्थभागे देशविशेषः । यथा,—
'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥
यमघण्टः, पुं, ( यमं घण्टयतीति । घण्ट + अण् । ) योगविशेषः । यथा,—
"द्वे मघापूर्व्वफल्गुन्यौ पुष्याश्लेषा च चन्द्रयोः ।
ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे ॥
हस्तार्द्रा चन्द्रजे मूला पूर्व्वाषाढ़ा च रेवती ।
जीवे स्युत्तरभाद्रञ्च शुक्रादे स्वातिरोहिणी ।
शनिवारे शतभिषा श्रवणा यमघण्टकः ॥"
इति सारसंग्रहः ॥
अपि च ।
"घण्टोऽर्कखण्डर्क्षयुक्ते स्वगृहपतिदिने सौम्यवारेऽर्य्यमापि ।"
अस्य वर्ज्ज्यकालनिर्णयो यथा,—
"यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाड़िकाः ।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम् ॥"
अस्य दोषा यथा,—
"एभिर्जातो न जीवेत यदि शक्रसमो भवेत् ।
विवाहे विधवा नारी यात्रायां मरणं भवेत् ॥
निष्फलं कृषिवाणिज्यं विद्यारम्भे च मूर्खता ।
गृहप्रवेशे भङ्गः स्याच्चूड़ायां मरणं ध्रुवम् ॥
ऋणदाने फलं नास्ति व्रतदाने च निष्फले ।
शुभकर्म्माणि सर्व्वाणि नैव कुर्य्याद्विचक्षणः ॥"
इति ज्योतिस्तत्त्वम् ॥
रविवारे १० । ११ । सोमवारे ८ । ९ । मङ्गलवारे १७ । १८ । १ । २ । बुधवारे १३ । ६ । वृहस्पतिवारे १९ । २० । २६ । २७ । शुक्रवारे १५ । ४ । शनिवारे २४ । २२ । इति यमघण्टयोगः ॥
यमजः, त्रि, ( यमो यमकः सन् जायते इति । जन् + डः । ) एककालीनैकगर्भजातसन्तानद्वयम् । यथा, मेदिनी । मे, २३ ।
"यमोऽन्यलिङ्गो यमजे ना काके शमने शनौ ।"
(यथा च कथासरित्सागरे । २३ । ६१ ।
"शान्तिकरोऽपि पुरोधा भ्रातृसुतं शान्तिसोमममरञ्च ।
वैश्वानरमर्पितवान् पिङ्गलिकापुत्रकौ यमजौ ॥" )